# अर्वाचीनवैयाकरणजयदेवमिश्रविरचितशास्त्रार्थरत्नावल्यां सावर्ण्यचिन्तनम्

उत्तमघोषः
शोधच्छात्रः,
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिकशोधसंस्थानम्,
वेलुडमठः, पश्चिमबङ्गराज्यम्
Email: uttamghoshvedvid@gmail.com

**समासेन ग्रन्थकृत्परिचयः**

चतुःपञ्चाशदधिकाष्टादशशततमे ईशाब्दे मिथिलायां चित्रनाथशचीदेव्योः क्रोडमलङ्कृत्य समजनि अयं जयदेवमिश्रः। काश्यां बालशास्त्रिणः विशुद्धानन्दसरस्वतेः कैलासचन्द्रशिरोमणेश्च व्याकरणं नव्यन्यायं वेदान्तञ्चाधीतवन्तोऽयं विद्वद्वरेण्यः। काशीस्थितदरभङ्गापाठशालायां प्रायेण चत्वारिंशद् वर्षाणि अध्याप्य तदनु पण्डितमदनमोहनमालवीयानुरोधमूररीकृत्य जीवनान्तं यावद् काशीहिन्दुविश्वविद्यालये शतशः छात्रान् अपाठयन् इमे विद्वांसः। तत्कृतिषु परिभाषेन्दुशेखरस्य विजया व्युत्पत्तिवादस्य च जया टीका आभारतं देदीप्यमाना राराजते। पाणिनीयसूत्राणां तथा परिभाषाणामुपरि तदीयग्रन्थः शास्त्रार्थरत्नावली अर्वाचीनशास्त्रार्थपरम्परायाश्चरमनिदर्शनत्वेन मूर्धन्यस्थानमारुह्य स्थितः। ऊनविंशत्यधिकोनविंशति-शततमे ईशाब्दे ब्रिटिशसर्वकारात् महामहोपाध्याय इत्युपाधिना सम्भूषिता इमे गुरुवर्याः। तन्माहात्म्यं ध्वनयता गङ्गानाथझामहोदयेन समुदघोषि-

जयः कुले जयोऽभ्यासे जय: पंडितमंडले।
जयो मृत्यौ जयो मोक्षे जयदेव: सदा जय:।।

षड्विंशत्यधिकोनविंशतितमेईशाब्दे द्वासप्ततितमे वयसि इमे काश्यामेव भौतिकलीलां समाकृष्य ब्रह्मणि लीनाः।

**सावर्ण्यविधिशास्त्रम्**

सवर्णसंज्ञाविधायकं सूत्रं तावत् तुल्यास्यप्रयत्नं सवर्णम् इति। तुल्यश्च तुल्यश्च इति तुल्यौ, आस्यञ्च प्रयत्नश्च इति आस्यप्रयत्नौ। तुल्यौ आस्यप्रयत्नौ यस्य तत् तुल्यास्यप्रयत्नम् इति। सवर्णमिति संज्ञापदम्। तुल्यास्यप्रयत्नं वर्णद्वयं सवर्णं भवतीत्यर्थः।

आस्यपदेन मुखे वर्तमानमुच्चारणस्थानं गृह्यते, प्रयत्नशब्देन च आभ्यन्तरयत्नाः गृह्यन्ते, तेन यस्य वर्णस्य यद् उच्चारणस्थानं यश्च आभ्यन्तरयत्नः तदेवोच्चारणस्थानं स एव च आभ्यन्तरयत्नः यदि अपरस्य वर्णस्य कृते अपेक्षते तर्हि तयोः वर्णयोः परस्परं सवर्णसंज्ञा भवति। अतः वृत्तिस्तावत्- ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यादिति।

आस्यप्रयत्नौ वर्णस्य जनकौ भवतः अतः परिष्कृतार्थो भवति यद्वर्णजनकौ आस्यप्रयत्नौ यद्वर्णजनकाभ्याम् आस्यप्रयत्नाभ्यां तुल्यौ तौ मिथः परस्परं सवर्णसंज्ञौ स्तः इति। अस्योदाहरणं ककारखकारयोः सवर्णसंज्ञा। तथाहि ककारस्य उच्चारणस्थानं कण्ठः आभ्यन्तरप्रयत्नश्च स्पर्शः , एवं खकारस्यापि उच्चारणस्थानं कण्ठः आभ्यन्तरप्रयत्नश्च स्पर्शः अतः यद्वर्णजनकौ कवर्णजनकौ आस्यप्रयत्नौ कण्ठस्पर्शौ यद्वर्णजनकाभ्यां खवर्णजनकाभ्यां आस्यप्रयत्नाभ्यां तुल्यौ तौ कवर्णखवर्णौ परस्परं सवर्णसंज्ञौ स्तः इति।

**आस्यशब्दार्थः**

अत्र अस्यन्ति वर्णा अनेन अस्यन्दते अन्नं प्राप्य द्रवीभवतीति वा व्युत्पत्त्या निष्पन्नस्य आस्यशब्दस्य मुखमित्यर्थः। ननु सर्वेषां वर्णानां मुखादेव उच्चारितत्वात् सर्वेषां वर्णानामुच्चारणस्थानं समानं स्यादतः उच्यते आस्ये भवमित्यर्थे शरीरावयवाद्यत् इत्यनेन आस्यशब्दाद्यति आस्यमिति, तेन आस्यं नात्र मुखम् अपि तु मुखे वर्तमानं यत्तदेव। ननु मुखे निष्ठीवनादीनामपि सत्त्वात् किम् आस्यपदेन तेषामपि ग्रहणमिति चेदुच्यते निष्ठीवनादीनां वर्णोच्चारणे उपयोगो नास्ति अतः तेषां न ग्रहणम्। एवञ्च मुखे भवं पुनश्च वर्णोच्चारणे सहायकं यत्तदेवात्र आस्यपदेन गृह्यते। एवमास्यपदेन ताल्वादि-उच्चारणस्थानं गृह्यते।

**तल्वादिकथने हेतवः**

ननु ताल्वादिस्थानं कथमुक्तं मातृकायाम् आदौ अकारस्य सत्त्वाद् तस्य कण्ठस्थानीयत्वात् कण्ठादिस्थानमिति वक्तव्यमसीदिति


Volume 2, Issue 2, 2023, p. 65-67, ISSN 2583-6331
©Indira Gandhi National Open University

चेदस्य समाधानत्रयमस्ति-

१. सुदेवोऽसि वरुण यस्य ते सप्त सिन्धवः, अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव इति व्याकरणप्रयोजनावसरे भाष्ये काकुदस्यैव इत्यनेन तालुनः एव ग्रहणाद् तत्साम्यादत्रापि तालुग्रहणम्।
२. अथवा तन्त्रेण निर्देशः, तालुनः आदिः ताल्वादिः नाम कण्ठः, तालु आदिर्येषां तानि ताल्वादीनि स्थानानीत्यर्थः। एवं ताल्वादिश्च ताल्वादीनि च इत्येकशेषे ताल्वादिशब्दो निष्पद्यते।
३. नागेशमते तु अत्र तद्धितान्तास्यशब्दोपादानबोधार्थमेव ताल्वादिरिति कथ्यते।

अत्र न तु प्रयतनं प्रयत्नः अपि तु प्रकृष्टो यत्नः प्रयत्नः, प्रकृष्टो यत्नो नाम प्रारम्भिकः यत्नः। वर्णोत्पत्तेः प्राक् यो यत्नः क्रियते सोऽत्र प्रयत्नशब्देन गृह्यते स च आभ्यन्तरप्रयत्नः एव। एवं सवर्णसंज्ञायाम् आभ्यन्तरप्रयत्नाः नियामका न तु बाह्यप्रयत्ना इति प्रशब्दोपादानेन ज्ञायते।

ननु सवर्णसंज्ञायां बाह्ययत्नाः कथं न गृह्यन्ते इति चेदुच्यते यदि बाह्ययत्नानामप्यत्र ग्रहणं तर्हि शिण्ढि इति रूपं न स्यात्। तथाहि शिन् ड् ढि इति स्थिते डकारढकारयोः उच्चारणस्थानाभ्यन्तरप्रयत्नयोः साम्येऽपि बाह्ययत्नभेदो वर्तते, डकारः अल्पप्राणः, ढकारो महाप्राणः अतः बाह्ययत्नभेदात्तयोः सवर्णसंज्ञा न स्यात् ततश्च झरो झरि सवर्णे इति सूत्रस्य प्राप्त्यभावात् डकारलोपाभावे शिण्ढि इति रूपं न स्यात्।

**यावत्स्थानसाम्यपक्षः**

ननु अस्मिन् सूत्रे यत्किञ्चित्स्थानसाम्यं विवक्षितमुत यावत्स्थानसाम्यमिति। यदि यत्किञ्चित्स्थानसाम्यं विवक्षितं स्यात् तर्हि इकार-एकारयोः सवर्णासंज्ञा प्राप्नोति, इचुयशानां तालु, एदैतोः कण्ठतालु इति तयोः तालुस्थानस्य साम्यात्, तेन करोति एवम् इत्यादिषु सवर्णदीर्घः प्राप्येत। न च वर्णसमाम्नाये इकार-एकारयोः पृथक्तया पाठात्तयोः सवर्णसंज्ञा न प्राप्नोतीति वक्तुं शक्यते अक् इक् इत्यादिप्रत्याहारेषु इकारस्य ग्रहणार्थमेव पृथक्तया इकारस्य पाठ इति दृष्टस्य प्रयोजनान्तरस्य सत्त्वादिति, एवम् इकार-एकारयोस्तु सवर्णसंज्ञा प्राप्नोतीति दोषः।

यदि चात्र यावत्स्थानसाम्यं विवक्षितं तदा यद्यपि इकार-एकारयोः सवर्णसंज्ञा न प्राप्नोति तेन यद्यपि पाणिनेः यजुष्येकेषाम् इत्यादिनिर्देशः सिध्यति तथापि यावत्स्थानसाम्यग्रहणेन ककारङकारयोः सवर्णसंज्ञा न प्राप्नोति तयोः कण्ठस्थानसाम्येऽपि ङकारस्य नासिकास्थानाधिक्यात्, तेन युङ् प्राङ् इत्यादिरूपं न सिध्येत्, तथाहि युन् इति स्थिते क्विन्प्रत्ययस्य कुः इत्यनेन ककारस्य सवर्णानां मध्ये ङकारस्य ग्रहणाभावात् नकारस्य स्थाने ङकारो न स्यात् अतः युङ् इत्यादिरूपं न स्यादिति दोषः।

अत्र सिद्धान्त उच्यते यदस्मिन् सूत्रे यावत्स्थानसाम्यमेव गृहीतं, तथापि ककारङकारयोः सवर्णसंज्ञाया बाधो न भवति यतो हि अस्मिन् सूत्रे आस्यपदेन मुखे वर्तमानानां स्थानानां ग्रहणम्। ङकारस्य यद् नासिकारूपमधिकमुच्चारणस्थानं वर्तते तत्तु आस्याद्बहिर्भूतम् इति। एवम् मुखनासिकावचनोऽनुनासिक इत्यादिसूत्रे मुखग्रहणे सत्यपि पुनः नासिकाग्रहणेनापि ज्ञायते नासिका मुखाद् बहिर्भूतेति। अतो न तयोः सवर्णसंज्ञाबाधः।

ननु तथापि उदात्ताकारानुदात्ताकारयोः सवर्णसंज्ञा न सिध्यति, उदात्ताकारः कण्ठस्य ऊर्ध्वभागात् निष्पन्नः, अनुदात्तः अकारः कण्ठस्य अधोभागान्निष्पन्नः, अतः तयोरेकस्य कण्ठस्य ऊर्ध्वभागनिष्पन्नत्वाद् अपरस्य च कण्ठस्याधोभागनिष्पन्नत्वात् तु यावत्स्थानसाम्यं नास्ति इति चेदुच्यते भगवता पाणिनिना कण्ठत्वेन कण्ठः, दन्तत्वेन दन्ताः एवम्प्रकारेण उच्चारणस्थानं विहितमतः उदात्तानुदात्तयोरकारयोस्तु कण्ठत्वेन कण्ठः, उच्चारणस्थानमस्त्येव अतो न तयोः उच्चारणस्थानभेदः। अतः सवर्णसंज्ञा सिध्यत्येव।

स्वरमात्रादिना समानयोरकारयोः कथं सवर्णसंज्ञा इति चेदुच्यते यद्यपि तत्र अकारयोः भेदो न दृश्यते तथापि प्रत्युच्चारणं शब्दा भिद्यन्ते इति न्यायेन तयोर्भेदोऽस्त्येव इति।

ननु पूर्वप्रतिपादितयोः ककारखकारयोः सवर्णसंज्ञा न सिध्यति यावत्स्थानसाम्याभावात्। साम्यं च सादृश्यं तच्च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। ककारखकारजनकयोः उच्चारणस्थानयोः प्रयत्नयोश्च तद्गतभूयोधर्मवत्त्वेऽपि तद्भिन्नत्वं नास्ति। ककारस्य उच्चारणे यद् उच्चारणस्थानं यश्च प्रयत्नः अपेक्षितः तदेवोच्चारणस्थानं स एव च प्रयत्नः खकारस्यापीति, अत्रोच्यते कार्यगतभेदस्य


©Indira Gandhi National Open University

कारणे आरोपः। कारणीभूतयोः कण्ठस्थानाभ्यन्तरप्रयत्नयोः यत्कार्यं ककारः खकारश्च तयोः भेदः कारणे आरोप्यते इति तद्भिन्नत्वे सतीति पदमेव नापेक्ष्यते इति भाष्ये विस्तरः।

**प्रयत्नस्य पृथग्ग्रहणयौक्तिकता**

ननु आस्यपदेन आस्यभवानां ग्रहणात् प्रयत्नस्य ग्रहणं मास्तु प्रयत्नस्यापि आस्यभवत्वात् इति चेदुच्यते तदा ह्रस्वदीर्घयोः स्वरवर्णयोः न सवर्णसंज्ञा सिध्यति, ह्रस्ववर्णजनकवायुसंयोगरूपाभ्यन्तरप्रयत्नस्य दीर्घवर्णजनकवायुसंयोगरूपाभ्यन्तरप्रयत्नाद् भिन्नत्वात् इति। अतः अत्र प्रयत्नशब्दः स्पृष्टेषत्स्पृष्टविवृतसंवृतेषु एव पारिभाषिकः। अतः तयोः विवृतरूपप्रयत्नसाम्यात् सवर्णसंज्ञायां न बाधः। पुनश्च अत्र आस्यपदेन आस्यभवानाम् उच्चारणस्थानानामेव ग्रहणं नान्येषामिति ज्ञापयितुमपि अत्र प्रयत्नशब्दस्य पुथगुल्लेखः।

सूत्रे आस्यपदाभावे केवलं प्रयत्नसाम्यादेव सवर्णसंज्ञा स्यात् तदानीं तर्प्ता इत्यत्र पकारतकारयोः स्पर्शरूपाभ्यन्तरप्रयत्नसाम्यात् सवर्णसंज्ञा स्यात्तेन च झरि झरि सवर्णे इत्यनेन हलः रेफात्परस्य झरः पकारस्य सवर्णे झरि तकारे परे लोपप्रसक्तिः स्यात्। सूत्रे प्रयत्नपदाभावे केवलम् उच्चारणस्थानसाम्यादेव सवर्णसंज्ञा स्यात् तेन वाक् श्च्योतति इत्यत्र शकारचकारयोः तालुरूपस्थानसाम्यात् सवर्णसंज्ञा स्यात् तदानीं झरो झरि सवर्णे इत्यनेन हलः ककारात्परस्य झरः शकारस्य सवर्णे झरि चकारे परे लोपप्रसक्तिः स्यादिति।

**शस्त्रार्थरत्नावलीदिशा निष्कृष्टार्थः**

अन्तिमे सर्वं विचार्य अस्य सूत्रस्य विद्वद्भिः स्वीकृतः निष्कृष्टः अर्थो भवति स्वविशिष्टः वर्णः स्वसवर्ण इति। एकस्य वर्णस्य यद्वैशिष्ट्यं तद्यदि अन्यस्य वर्णस्य स्यात्तदा तयोः वर्णयोः सवर्णसंज्ञा सिध्यति। किं तद्वैशिष्ट्यमिति चेत् स्वजनकस्थानजन्यत्वम्, स्वाजनकास्थानाजन्यत्वम्, स्वजनकप्रयत्नजन्यत्वम्, स्वाजनकप्रयत्नाजन्यत्वमिति। स्वजनकस्थानजन्यत्ववैशिष्ट्यस्वीकारेण न कचयोः सवर्णसंज्ञा। कवर्णजनककण्ठस्थानजन्यत्वं न चकारे अपि तु अजन्यत्वमेव अस्ति। स्वाजनकस्थानाजन्यत्ववैशिष्ट्यस्वीकारेण न इकार-एकारयोः सावर्ण्यम्। इकाराजनककण्ठस्थानजन्यत्वमेव एकारे न तु अजन्यत्वम्। स्वजनकप्रयत्नजन्यत्ववैशिष्ट्यस्वीकारेण चकारयकारयोर्न सवर्णसंज्ञा। चकारजनकस्पर्शप्रयत्नाजन्यत्वमेव यकारे न तु जन्यत्वम्। स्वाजनकप्रयत्नाजन्यत्वरूप-चतुर्थवैशिष्ट्यस्वीकारेण न एकार-ऐकारयोः सवर्णसंज्ञा। एकारजनकविवृततरप्रयत्नजन्यत्वमेव ऐकारे न तु अजन्यत्वम्। एवं परिष्कृतोऽर्थो भवति स्वजनकस्थानजन्यत्व-स्वाजनकास्थानाजन्यत्व-स्वजनकप्रयत्नजन्यत्व-स्वाजनकप्रयत्नाजन्यत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभाववान् वर्णः सवर्णसंज्ञकः भवतीति शम्।

**परिशीलितग्रन्थसूची**


1. भट्टोजिदीक्षितः।२०१०।वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिनीसहिता)।शर्मा, परमेश्वरानन्दः(सम्पा०)।वाराणसी : मोतिलालबनारसीदास।
2. भट्टोजिदीक्षितः।२०१५।वैयाकरणसिद्धान्तकौमुदी (मूलमात्रम्)।श्रीगोविन्दाचार्यः (सम्पा०)।वाराणसी : चौखम्बासुरभारतीप्रकाशन।
3. नागेशभट्टः।२०१३।लघुशब्देन्दुशेखरः (सुबोधिनीहिन्दीव्याख्योपेतः)।मिश्रः, विश्वनाथः (सम्पा०)।वाराणसी : चौखम्बासुरभारतीप्रकाशन।
4. पतञ्जलिः।२०१३।व्याकरणमहाभाष्यम् (प्रदीपोद्योतभावबोधिनीहिन्दीव्याख्यासमुल्लसितम्)।त्रिपाठी, जयशङ्करलालः (सम्पा०)।वाराणसी : कृष्णदासअकादेमी।
5. पतञ्जलिः।२०१४।व्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतसमुल्लसितम्)।जोशी, भार्गवशास्त्री (संशोधकः)।दिल्ली : चौखम्बासंस्कृतप्रतिष्ठान।
6. प्रो. कृष्णकुमारः। महाभाष्यार्थदीपिका, Chinmaya International Foundation Shodha Sansthan
7. एम एस नरसिंहाचार्यः। महाभाष्यप्रदीपव्याख्यानानि, INSTITUT FRANÇAIS D'INDOLOGIE PONDICHERY,1978
8. पण्डित शिवदत्तशर्मा। व्याकरणमहाभाष्यम्, चौखम्बा संस्कृत प्रतिष्ठान।



©Indira Gandhi National Open University